# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

---

### ०२७ पञ्चराशिकादिकम्

०६ - ०६ - २०१९

# गतकक्ष्यायाम् ...

- व्यस्तत्रैराशिकम्

# अस्यां कक्ष्यायाम् ...

- पञ्चराशिकादिकम्

# पञ्चराशिकम्

मासे शतस्य यदि पञ्चकलान्तरं स्यात्
वर्षे गते भवति किं वद षोडशानाम् ।
कालं तथा कथय मूलकलान्तराभ्यां
मूलं धनं गणक कालफले विदित्वा ॥

अन्वयः - गणक,

१) यदि मासे शतस्य पञ्चकलान्तरं स्यात्, (तर्हि) वर्षे गते षोडशानां किं भवति वद
२) तथा मूलकलान्तराभ्यां कालं कथय
३) कालफले विदित्वा मूलं धनं (कथय)

त्रयः उद्देशकाः

# पञ्चराशिकम्

यदि मासे शतस्य पञ्चकलान्तरं स्यात्, (तर्हि) वर्षे गते षोडशानां किं भवति वद

१०० (निष्काः) : १६ (निष्काः) ऋजुः

:: ५ निष्काः : य

१ मासः : १२ मासाः ऋजुः

$$य = \frac{(५ \, x \, १६ \, x \, १२)}{(१०० \, x \, १)} = \frac{४८}{५} = ९\frac{३}{५} \text{ निष्काः}$$

# पञ्चराशिकम्

तथा मूलकलान्तराभ्यां कालं कथय

| | | | | |
|---|---|---|---|---|
| १०० (निष्काः) : १६ (निष्काः) | | | | व्यस्तः |
| | :: | १ मासः | : य | |
| ५ निष्काः : $\frac{४८}{५}$ निष्काः | | | | ऋजुः |

$$य = \frac{\left(१ \, x \, १०० \, x \, \frac{४८}{५}\right)}{\left(१६ \, x \, ५\right)} = १२ \text{ मासाः}$$



# पञ्चराशिकम्

कालफले विदित्वा मूलं धनं (कथय)

| | | | | |
|---|---|---|---|---|
| १ मासाः | : | १२ मासाः | | व्यस्तः |
| | | | :: १०० (निष्काः) : य | |
| ५ निष्काः | : | $\frac{४८}{५}$ निष्काः | | ऋजुः |

$$य = \frac{\left(१०० \, x \, १ \, x \, \frac{४८}{५}\right)}{\left(१२ \, x \, ५\right)} = १६ \text{ निष्काः}$$

# नवराशिकम्

पिण्डे येऽर्कमिताङ्गुलाः किल चतुर्वर्गाङ्गुला विस्तृतौ
पट्टा दीर्घतया चतुर्दशकरास्त्रिंशल्लभन्ते  शतम् ।
एता विस्तृतिपिण्डदैर्घ्यमितयो येषां चतुर्वर्जिताः
पट्टास्ते वद मे चतुर्दश सखे मूल्यं लभन्ते कियत् ॥

अन्वयः - ये पट्टाः  पिण्डे अर्कमिताङ्गुलाः
विस्तृतौ चतुर्वर्गाङ्गुलाः
दीर्घतया चतुर्दशकराः
त्रिंशत् (सङ्ख्याकाः)  लभन्ते शतं (निष्काः) ,
येषां एताः विस्तृतिपिण्डदैर्घ्यमितयः चतुर्वर्जिताः , ते पट्टाः चतुर्दश (सङ्ख्याकाः)
कियत् मूल्यं लभन्ते (इति) सखे , मे वद ।

# नवराशिकम्

१४ करा: : १० करा: ऋजु:

१६ अङ्गुला: : १२ अङ्गुला: ऋजु:

:: १०० (निष्का:) : य

१२ अङ्गुला: : ८ अङ्गुला: ऋजु:

३० : १४ ऋजु:

$$य = \frac{(१०० x १० x १२ x ८ x १४)}{(१४ x १६ x १२ x ३०)} = \frac{५०}{३} = १६\frac{२}{३} \text{ निष्का:}$$

# पञ्चराशिकादिकम्

पञ्चसप्तनवराशिकादिकेऽन्योन्यपक्षनयनं फलच्छिदाम् ।
संविधाय बहुराशिजे वधे स्वल्पराशिवधभाजिते फलम् ॥

अन्वयः - पञ्चसप्तनवराशिकादिके फलच्छिदाम् अन्योन्यं पक्षनयनं संविधाय बहुराशिजे वधे स्वल्पराशिवधभाजिते फलम् ।

१०० (निष्काः) : १६ (निष्काः) → → १६ (निष्काः) : १०० (निष्काः)

५ निष्काः : $\frac{४८}{५}$ निष्काः → → ५ निष्काः : $\frac{४८}{५}$ निष्काः

# अन्योद्देशकाः

१) पट्टा ये प्रथमोदितप्रमितयो गव्यूतिमात्रे मताः
तेषामानयनाय चेच्छकटिना द्रम्माष्टकं भाटकः ।
अन्ये ये तदनन्तरं निगदिता माने चतुर्वर्जिताः
तेषां का भवतीह भाटकमितिर्गव्यूतिषट्के वद ॥
[*नवराशिकोद्देशकोक्तविवरणमवलम्ब्यायमुद्देशकः]

२) सत्र्यंशमासेन शतस्य चेत्स्यात् कलान्तरं पञ्च सपञ्चमांशः ।
मासैस्त्रिभिः पञ्चलवाधिकैस्तैः सार्धद्विषट्कैः फलमुच्यतां किम् ॥

३) विस्तारे त्रिकराः कराष्टकमिता दैर्घ्ये विचित्राश्च चेत्
रूपैरुत्कटपट्टसूत्रपटिका अष्टौ लभन्ते शतम् ।
दैर्घ्ये सार्धकरत्रयापरपटी हस्तार्धविस्तारिणी
तादृक् किं लभते द्रुतं वद वणिग् वाणिज्यकं वेत्सि चेत् ॥

# अन्योद्देशकाः

४) पञ्चशतस्य तु मासे षष्टेर्वर्षेण किं फलं लभते ।
फलतश्च कथय कालं ताभ्यामज्ञातमूलं च ॥

५) सार्धस्य शतस्य फलं मासत्र्यंशेन रूपमध्यर्धम् ।
विचरणसप्तदशानां किं फलमर्धाष्टमैर्मासैः ॥

६) द्विकव्यासोऽष्टकायामः कम्बलो लभते दश ।
ततो द्वौ त्रिकरव्यासौ नवायामौ किमाप्नुतः ॥

७) आयामव्यासपिण्डेषु नवपञ्चैकसम्मिता ।
लभतेऽष्टौ शिला किं द्वे दशसप्तद्विसम्मिते ॥



# अन्योद्देशकाः

८) आयामतो नवकराः परिधिस्तथाष्टौ
यस्योच्छ्रयो दशदलं च गजस्य सोऽह्नि ।
प्रस्थत्रयं त्रिगुणितं दलवर्जितं च
भुङ्क्ते सहेलगमने मदलिप्तगण्डः ॥
आयामतो दशकराः परिधिर्नवैव
सप्तोच्छ्रया दश गजा दिनपञ्चके किम् ॥

# लीलावती

## श्रीमद्भास्कराचार्यविरचिता

### ०२७ पञ्चराशिकादिकम्

०६ - ०६ - २०१९